

समाहतं षट्स्वरेषुविहृतं करात्मकम् । उदाहरणम् ।
मूले नखा(२०)ङ्गुलमितोऽथ नृपा(१६)ङ्गुलोऽग्रे पिण्डः
शताङ्गुलमितं किल यस्य दैर्घ्यम् । तद्दारुदारणपथेषु
चतुर्षु किं स्याद्धस्तात्मकं वद सखे ! गणितं द्रुतं मे ।
(तदाकारदर्शनार्थं चित्रम्)




न्यासः

पिण्डयोग३६दलं । १८ । दैर्घ्येण १०० सङ्गुणितं १८०० । दारुदारणपथैश्चतुर्भिर्गुणितं ७२०० । षट्स्वरेषु ५७६ विहृतं जातं करात्मकं गणितं २५/२ । क्रकचान्तरे करणस्थलं सार्द्धहस्तम् । छिद्यते तु यदि तिर्य्यगुक्तवत्पिण्डविस्तृतिहतेः फलं तदा । इष्टिकाचितिदृषच्चितिखातक्राकचव्यवहृतौ खलु मूल्यम् । कर्म्मकारजनसम्प्रतिपत्त्या तन्मृदुत्वकठिनत्ववशेन । उदाहरणम् । यद्विस्तृतिर्द्दन्त ३२ मिताङ्गुलानि पिण्डस्तथा षोडश यत्र काष्ठे । छेदेषु तिर्य्यङ्नवसु प्रचक्ष्व किं स्यात् फलं तत्र करात्मकं मे ॥

न्यासः विस्तारः ३२ पिण्डः ।१६। पिण्डविस्तृतिहतिः
(तदाकारचित्रम् ।)




५१२ । दारुदारणमार्गैर्नवभिर्हता ४६०८ । षट्स्वरेषु ५७६ विहृता जातं फलं हस्ताः । ८ ।"

क्रकचा स्त्री क्रकचस्तदाकारोऽस्त्यस्याः अर्श० अच् टाप् । केतकीवृक्षे रत्नमा० ।

क्रकण पु० क्र इति कणति शब्दायते कण—अच् । (कयार) पक्षिभेदे अमरः स्त्रियां जातित्वात् ङीष् ।

क्रकर पु० क्र इति शब्दं कर्त्तुं शीलमस्य ताच्छील्ये ट । क्रकणे (कयार) १पक्षिणि अमरः स्त्रियां ङीष् । २करीरवृक्षे ३करपत्राख्ये च पु० ४दीने त्रि० हेमच० "चोरयित्वा तु पक्षीणां क्रकरत्वं नियच्छति" भा० अनु० १११अ० । "चकोरकलविङ्कमयूरक्रकरेत्याद्युपक्रमे "विष्कराः लघवः शीतमधुराः कषाया दोषशमनाश्च" इति सामान्यत उक्त्वा "वातपित्तहरा वृष्या मेधाग्निबलवर्द्धनाः । लघवः क्रकराः हृद्यास्तथा चैवोपचक्रकाः" सुश्रु० तन्मांसगुणा उक्ताः ।

क्रतु पु० कृ-कतु । १यूपसहिते, सोमसाध्ये यज्ञे, २संकल्पे, ब्रह्मणोमानसे पुत्रे ३ऋषिभेदे, ४वैश्वदेवभेदे, ५इन्द्रियेषु च । ६विष्णौ तस्य सर्व्वयज्ञमयत्वेन सयूपयज्ञरूपत्वमपीष्टं यथाह "यज्ञइज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः" विष्णुस० । "सर्व्वयज्ञस्वरूपत्वात् यज्ञः यूपसहितोयज्ञः क्रतुरिति" भाष्यम् । तेन क्रतुशब्दस्य यूपसहितयज्ञबोधकता । अतएव तद्यागे यूपविशेषाः शतपथब्राह्मणादौ उक्ताः । तत्र सोमसाध्ययागाश्च त्रय क्रतवः "त्रीन् क्रतूनन्वाहाग्नेयक्रतुपशुमाश्विनम्" श्रुतौ "द्वृत्यन्ये यः क्रतुः अग्नीषोमीयः" "अथाश्विनः" आश्व०श्रौ० ४।११।८।१४।१।१५।१। सूत्रेषु दर्शिताः । अन्येऽपि क्रतवो वेदेषु दर्शितास्ततएवा वगम्याः । संकल्पश्च कामनाधीनः चित्तवृत्तिभेदः यथोक्तम् "कामः क्रतुः कर्म्म जन्म त्वेवमेषां क्रमोभवेत् । पुंसोया विषयापेक्षा स काम इति भण्यते । सएव वर्द्धमानस्तु क्रतुत्वं प्रतिपद्यते" । "रुचेरतिशयः काम्ये विषये क्रतुरीर्य्यते" इत्युक्ते ७रुचेराधिक्ये च । ८प्रज्ञायां निघ० । ९स्तवनादिकर्म्मणि च । "पुरुहूत ! क्रत्वा नः शग्धि" ऋ० ४।२१।१०। "क्रत्वा कर्म्मणा स्तुत्यादिहेतुना" भा० । क्रतुनामा मुनिश्च "ब्रह्मणोमानसाः एता विदिताः षण्महर्षयः । मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः" भा० आ०६५अ० उक्तः । "क्रतोरपि क्रियाभार्य्या वालखिल्यानसूयत । ऋषीन् षष्टिसहस्राणि ज्वलतो ब्रह्मतेजसा" भाग० ४।१।३२। तदंशाद्युत्पत्तिः "ससर्ज सृष्टिं तद्रूपां स्रष्टुमिच्छन् प्रजापतीन् मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् । वसिष्ठञ्च महातेजाः सोऽसृजत् सप्त मानसान्" हरिवं० १अ० । विश्वेदेवाश्च त्रयोदश यथा
"आत्मार्थं चासृजत् पुत्रान् लोककर्तॄन् पितामहः । विश्वे प्रजानां पतयो येभ्यो लोका विनिःसृताः । विश्वेषां प्रथमं नाम महातपस्समात्मजम् । सर्व्वाश्रमपदं पुण्यं नाम्ना